# पिपीलिका विपणीं गच्छति

(संस्कृतबालगीतसङ्ग्रहः)





हर्षदेवमाधवः

# पिपीलिका विपणीं गच्छति

( संस्कृतबालगीतसङ्ग्रहः )

डॉ. हर्षदेवमाधवः

राष्ट्रिय संस्कृत संस्थान

दिल्ली

# अनुक्रमः


| | | |
|---|---|---|
| १. | प्रभ्रष्टा पुत्तलिका | १-५ |
| २. | वनदेव्या वरदानम् | ६-९ |
| ३. | आहतः भास्करशशकः | १०-१४ |
| ४. | चटकाया जन्मदिवसः | १५-१७ |
| ५. | मार्जार्याः रक्षाबन्धनपर्व | १८-२१ |
| ६. | वनस्य पाठशाला | २२-२५ |
| ७. | वर्णसृष्टिः | २६-२७ |
| ८. | रामो हन्ति दशाननम् | २८-३० |
| ९. | सप्ताहस्य आनन्दः | ३१-३३ |
| १०. | निखिलम् आनयति पिन्टुकुक्कुरः | ३४-३८ |
| ११. | पिपीलिका विपणीं गच्छति | ३९-४२ |
| १२. | लब्धः कन्दुकः पुनः | ४३-४६ |
| १३. | दुष्टः शृगालः | ४७-४९ |
| १४. | न सन्ति अम्लाः, किन्तु मिष्टाः द्राक्षाः | ५०-५२ |
| १५. | रोदिति कलभः | ५३-५५ |

# अनुक्रमः


| | | |
|---|---|---|
| १. | प्रभ्रष्टा पुत्तलिका | १-५ |
| २. | वनदेव्या वरदानम् | ६-९ |
| ३. | आहतः भास्करशशकः | १०-१४ |
| ४. | चटकाया जन्मदिवसः | १५-१७ |
| ५. | मार्जार्याः रक्षाबन्धनपर्व | १८-२१ |
| ६. | वनस्य पाठशाला | २२-२५ |
| ७. | वर्णसृष्टिः | २६-२७ |
| ८. | रामो हन्ति दशाननम् | २८-३० |
| ९. | सप्ताहस्य आनन्दः | ३१-३३ |
| १०. | निखिलम् आनयति पिन्टुकुक्कुरः | ३४-३८ |
| ११. | पिपीलिका विपणीं गच्छति | ३९-४२ |
| १२. | लब्धः कन्दुकः पुनः | ४३-४६ |
| १३. | दुष्टः शृगालः | ४७-४९ |
| १४. | न सन्ति अम्लाः, किन्तु मिष्टाः द्राक्षाः | ५०-५२ |
| १५. | रोदिति कलभः | ५३-५५ |

# १. प्रभ्रष्टा पुत्तलिका

मेलापकस्थानं प्रति याति
मीता षड्वर्षीया ।
यान्ति रीता-मीना-शोभा
सर्वाः यान्ति प्रीत्या ॥

नीचैरुपरि च शीघ्रं यान्ति हि
क्रीडार्थं चक्राणि ।
क्वचिद् वर्तुलाकारं गत्वा
भवन्ति अथ वक्राणि ।

सर्वबालकाः क्रीणन्त्येव
नवानि क्रीडनकानि ।
पयोहिमं[१] खादन्ति केचित्
केचिन् मिष्टान्नानि ।

[२]फुल्लकानि नानावर्णानि
प्रलोभयन्ति सर्वान् ।
विक्रेतार आह्वयन्ति
उच्चैः उक्त्वा लोकान् ।

---

१. पयोहिमं - Icecream

२. फुल्लकानि - Balloons

**RASHTRIYA SANSKRIT SANSTHAN**

Deemed University
56-57,Institutional Area, Janakpuri,
New Delhi-110058
Phone : +91-11-28524993, 28520976, 28520977
E-Mail:rsks@nda.vsnl.net.in